# M.A. (Part—II) Examination

## SANSKRIT

## (Sahityashastra)

## Paper—I

Time : Three Hours] [Maximum Marks : 100

सूचना :—सर्वा: प्रश्ना: स्वीकृतभाषयैव समाधेया: ।

(काव्यप्रकाश:)

1. केषामपि **त्रयाणां** सविवेचनमनुवाद कुरुत : 15

(1) काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।
सद्य: परनिर्वृतये कान्तासम्मिततयोपदेशयुजे ।।

(2) सङ्केतितश्चतुर्भेदो जात्यादिर्जातिरेव वा ।

(3) विभावानुभावास्तत कथ्यन्ते व्यभिचारिण: ।
व्यक्त: स तैर्विभावाद्यै: स्थायीभावो रस: स्मृत: ।

(4) शृङ्गारहास्यकरुणरौद्रवीरभयानका: ।
बीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्ये रसा: स्मृता: ।।

(5) उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित् ।
हारादिवदलंकारास्तेऽनुप्रासोपमादय: ।।

(6) वक्त्राद्यौचित्यवशाद्दोषोऽपि गुण: क्वचित्क्वचिन्नोभौ ।।

2. टिप्पणीत्रयं लिखत :— 15

(1) शक्ति: कवित्वबीजरूप: संस्कारविशेष: ।

(2) तात्पर्यार्थोऽपि केषुचित् ।

(3) अविवक्षितवाच्यध्वनि: ।

(4) अभिधामूल-व्यञ्जना ।

(5) पदगतअविमृष्टविधेयांशदोष: ।

(6) गुणेषु वर्णचयनम् ।

3. लक्षणाप्रकारान् सोदाहरणं विवृणुत। 10

**अथवा**

मम्मटेन वामनाचार्यस्य गुणविभाजनस्य खण्डनं कथं कृतम् ?

**(ध्वन्यालोक उद्योतः 2)**

4. (अ) केषाञ्चित् **त्रयाणां** सविवेचनमनुवादं कुरुत :— 12

(1) अर्थान्तरे संक्रमितमत्यन्तं वा तिरस्कृतम्।
अविवक्षितवाच्यस्य ध्वनेर्वाच्यं द्विधा मतम्।।

(2) रसभावतदाभासतत्प्रशान्त्यादिरक्रमः।
ध्वनेरात्माङ्गिभावेन भासमानो व्यवस्थितः।।

(3) ध्वन्यात्मभूते शृङ्गारे समीक्ष्य विनिवेशितः।
रूपकादिरलङ्कारवर्ग एति यथार्थताम्।।

(4) आक्षिप्त एवालङ्कारः शब्दशक्त्या प्रकाशते।
यस्मिन्ननुक्तः शब्देन शब्दशक्त्युद्भवो हि सः।।

(5) अलंङ्कारान्तरस्यापि प्रतीतौ यत्र भासते।
तत्परत्वं न वाच्यस्य नासौ मार्गो ध्वनेर्मतः।।

(6) प्रौढोक्तिमात्रनिष्पन्नशरीरः सम्भवी स्वतः
अर्थोऽपि द्विविधो ज्ञेयो वस्तुनोऽन्यस्य दीपकः।।

(ब) टिप्पणी**द्वयं** लिखत : 8

(1) विवक्षितवाच्यध्वनि

(2) अर्थशक्तिमूलध्वनिः।

(3) प्रसादगुणः।

(4) व्यतिरेकध्वनिः।

**(भामहकाव्यालङ्कारः)**

5. केषाञ्चित् **चतुर्णां** सविवेचनमनुवादं कुरुत :— 20

(1) धर्मार्थकामामोक्षेषु वैचक्षण्यं कलासु च।
प्रीतिं करोति कीर्तिं च साधुकाव्यनिबन्धनम्।।

(2) शब्दाऽभिधेये विज्ञाय कृत्वा तद्विदुपासनाम्
विलोक्याऽन्यनिबन्धांश्च कार्यः काव्यक्रियादरः।।

(3) आदिमध्यान्तयमकं पादाभ्यासं तथावली।
समस्तपादयमकमित्येतत् पञ्चधोच्यते।।

(4) उपन्यसनमन्यस्य यदर्थस्योदितादृते।
ज्ञेयः सोऽर्थान्तरन्यासः पूर्वार्थानुगतो यथा।।

(5) पर्यायोक्तं यदन्येन प्रकारेणभिधीयते।
उवाच रत्नाहरणे चैत्रं शार्ङ्गधनुर्यथा।।

(6) अपह्नुतिरभीष्टा च किञ्चिदन्तर्गतोपमा।
भूतार्थापह्नवादस्याः क्रियते चाभिधा यथा।

**(वामनकृतकाव्यालङ्कारसूत्रवृत्तिः)**

6. केषाञ्चित् **चतुर्णां** विवेचनं कुरुत :— 20

(1) काव्यं सदृष्टादृष्टार्थम्, प्रीतिकीर्तिहेतुत्वात्।

(2) अरोचकिनः सतृणाभ्यवहारिणश्च कवयः।

(3) कवित्व बीजं प्रतिभानम्।

(4) ओजः कान्तिमती गौडीया।

(5) पद्यभागवद्वृत्तगन्धि।

(6) छन्दोविचितेर्वृत्तसंशयच्छेदः।